खट्वा, खट्वे, खट्वाः । [1]खट्वाम्, खट्वे, खट्वाः । खट्वया, खट्वाभ्याम्, खट्वाभिः । खट्वायै, खट्वाभ्याम्, खट्वाभ्यः । खट्वायाः, खट्वाभ्याम्, खट्वाभ्यः । खट्वायाः खट्वयोः, खट्वानाम् । खट्वायाम्, खट्वयोः, खट्वासु । एवं बहुराजाकारीषगन्ध्ये चोदाहार्ये । [2]एवं प्रातिपदिकात् –– दृषद्, दृषदौ, दृषदः । [3]दृषदम्, दृषदौ, दृषदः । दृषदा, दृषद्भ्याम्, दृषद्भिः । दृषदे, दृषद्भ्याम्, दृषद्भ्यः । दृषदः, दृषद्भ्याम्, दृषद्भ्यः । दृषदः, दृषदोः, दृषदाम् । दृषदि, दृषदोः, दृषत्सु ।।

## स्त्रियाम् । (३/४८३)

अधिकारोऽयम् । यद् इत ऊर्ध्वमनुक्रमिष्यामः स्त्रियाम् इत्येवं तद् वेदितव्यम् । 'ङ्याप्प्रातिपदिकात्' (४.१.१/१८२) इति सर्वाधिकारेऽपि प्रातिपदिक[4]मात्रमत्र प्रकरणे सम्बध्यते, ङ्यापोरनेनैव[5] विधानात् । स्त्रियाम् इत्युच्यते । केयं स्त्री नाम ? सामान्यविशेषाः स्त्रीत्वादयो गोत्वादय इव बहुप्रकारा [6]व्यक्तयः । क्वचिदाश्रयविशेषाभावात् [7]उपदेशव्यङ्ग्या एव भवन्ति, यथा ब्राह्मणत्वादयः । स्त्रीत्वं च प्रत्ययार्थः प्रकृत्यर्थविशेषणं [8]च इत्युभयथापि [9]प्रयुज्यते, स्त्रियामभिधेयायां स्त्रियां वा यत् प्रातिपदिकं वर्तते इति । वक्ष्यति – 'अजाद्यतष्टाप्' (४.१.४/४५४) । अजा । देवदत्ता । स्त्रियाम् इति किम्? अजः । देवदत्तः ।।

## अजाद्यतष्टाप् । (४/४५४)

अजादिभ्यः प्रातिपदिकेभ्यः [10]अकारान्ताच्च [11]प्रातिपदिकात् स्त्रियां टाप् प्रत्ययो भवति । पकारः [12]सामान्यग्रहणार्थः । टकारः [13]सामान्यग्रहणाविघातार्थः । अजा । एडका । [14]कोकिला । चटका । अश्वा[15] । खट्वा । देवदत्ता । तपरकरणं तत्कालार्थम् । [16]शुभंयाः । कीलालपाः ब्राह्मणी । 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' (६.१.६८/२५२) इति [17]सुलोपः स्यात् । अजादिग्रहणं तु क्वचिज्जातिलक्षणे ङीषि प्राप्ते (४.१. ६३/५१८), क्वचित् तु पुंयोगलक्षणे (४.१.४८/५०४), क्वचित् तु पुष्पफलोत्तरलक्षणे (४. १.६४/ ५१९), [18]क्वचित्तु वयोलक्षणे ङीपि[19] (४.१.२०/४७८), क्वचिट् टिल्लक्षणे (४.१.१५/४७०) । हलन्तानां [20]त्वप्राप्त एव कस्मिंश्चिदाब् विधीयते । शूद्रा चामहत्पूर्वा जातिः (म.भा. २. २०१) इति पठ्यते । तस्यायमर्थः । शूद्रशब्दष्टापमुत्पादयति जातिश्चेद्[21] भवति । शूद्रा । पुंयोगे [22]ङीषैव भवितव्यम् । शूद्रस्य भार्या शूद्री । महत्पूर्वस्य प्रतिषेधः[23] । महाशूद्री (म.भा. २.२०१) । महाशूद्रशब्दो ह्याभीरजातिवचनः, तत्र तदन्तविधिना टाप् प्राप्तः प्रतिषिध्यते । 'ग्रहणवता प्रातिपदिकेन [24]तदन्तविधिर्न[25]' (व्या.प. ८९) इति कथं तदन्तविधिः ? एतदेव ज्ञापकं भवति[26] अस्मिन् प्रकरणे तदन्तविधिः इति । तेन अतिधीवरी, अतिपीवरी, [27]अतिभवती, अतिमहती इति [28]भवति ।

---

1. खट्वाम् – खट्वासु नास्ति ड. 2. एवं नास्ति फ. 3. दृषदम् – दृषत्सु नास्ति फ. 4. °मात्रमिह फ. 5. प्रकरणेन इत्यधिकम् क. 6. हि इत्यधिकम् फ. 7. उपदेशमात्रेणापि फ. 8. च एतत् इ. ह. 9. युज्यते ग. ह. 10. अदन्तात् ड. फ. 11. प्रातिपादिकात् नास्ति फ. 12. स्वरग्रहणार्थः फ, स्वरसामान्यग्रहणार्थः अ.क.ग. 13. तद्विघातार्थः फ. 14. कोकिला चटका अश्वा नास्ति ड.ह, चटका नास्ति इ. क. फ. 15. अकारान्ता इत्यधिकम् फ. 16. शुभंयः इ.ड. 17. लोपः ह. 18. क्वचित्तु नास्ति ह. 19. प्राप्ते इत्यधिकम् इ. 20. चाप्राप्त एव ब.फ. 21. सा इत्यधिकम् फ. 22. ङीषेव भवति ब.फ.क. 23. वक्तव्य इत्यधिकम् फ. 24. तद्विधिः फ. 25. भवति इत्यधिकम् ग. 26. अत्र क.फ.ह. 27. अतिभवती नास्ति क.ड.फ. 28. सिद्धम् ब.क.ड.फ.ह.